M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 1504

Title: Sthati Patta

1504

incomplete

C Sthali Paka

	:	:	: **Title**
	:	:	: Author
	:	:	: Editor
	:	:	: Year, Vols.
Sk	:	:	: Publisher
1504	:	:	: Remarks

स्था॰पा॰ श्रीगणेशायनमः॥ अथविवाहोत्तरंकर्त्तव्योपिस्थालीपाकः प्रथममुच्यते॥
तत्रांगानामुक्तानामन्येषामिहेशेनप्राप्तेः॥ सचविवाहानंतरंकर्त्तव्यगृह
प्रवेशनीयहोमोत्तरकालभाविन्यांपौर्णमास्यामारंभणीयः॥ तत्वमावा
१ स्यायां चतुर्थीहोमात्प्रागपिपौर्णमासीचेत्तदारंभः यदित्वारंभकाले
मलमासगुरुशुक्रास्तबाल्यवार्धक्यग्रहणपौषमासादिभवतितदापि
प्रारंभःकार्यः यानितु तत्रारंभनिषेधकानि उपरागाधिमासश्चयादि
प्रथमपर्वणि तथामलिम्लुचेपौषेनान्वारंभणमिष्यते। गुरुभार्गवयो
मौढ्येपौषेस्वापिमलिम्लुचे ग्रहणेचार्कसंक्रांतावाद्यंपर्वनचारभेत् इ १
त्यादिसंग्रहकारवचनानि तान्यालस्यादिनास्वकालानुपक्रांतस्था

लीपाकादिप्रारंभविषयाणीतिप्रयोगपारिजातकारः तथाचापरार्कस्थंगार्ग्य
वचनमुदाजहार। नामकर्मचदर्शादिं यथाकालंसमाचरेत् अतिपातेसति
तयोःप्रशस्तेमासिपुण्यभे। इतिस्थालीपाकप्रारंभकालनिर्णयः॥
अथपर्वनिर्णयः पूर्णिमादर्शश्चपर्व तत्रान्वाधानंप्रतिपदीष्टिरि
त्युत्सर्गः तत्रपर्वचतुर्थांशःप्रतिपदश्चाद्यास्त्रयोंशाः सूर्योदयोत्तरंमु
हूर्तत्रयेविद्यमानायागकालः सूर्यास्तमानपर्यंतंयत्रपर्वाखंडंतत्र
नसंदेहः यदितुखंडंपर्वतत्रानिर्णयः अह्नोमध्येततःपूर्वंवापर्वप्रतिप
दोःसंधौतदहर्यागःपूर्वेद्युरन्वाधानं मध्यात्परेसंधौतदहरन्वाधानं
परेद्युर्यागइति संधिश्चप्रतिपदोह्रासवृद्ध्योरर्धंपर्वणिप्रक्षिप्यज्ञे

स्था०पा० मः इष्टेः पर्वणि समाप्तौ पुनरिष्टिकर्तव्यतापत्तेः सा प्रतिपद्येव समापनी
या नपर्वसंध्ये अपराह्णसंधौ परेद्युः प्रतिपच्चतुर्थांशे प्रयोगेन दोषः
चंद्रदर्शनदिने इष्टिनिषेधवचनानि निर्णयक्रमानिसंभवे योज्यानि
२ यातु पौर्णमास्यां संगवादूर्ध्वमावर्तनात्पूर्वं संधिमती सा सद्यस्कालि
नीतस्यामेवान्वाधानयागश्च॰ अथ विकृतौ निर्णयः आवर्तनेनतः
पूर्वं वा पर्वसंधौ तद्दहरेव प्रकृतियागं कृत्वा पश्चादाग्रयणादिवि
कृतिः कार्या परसंधौ तु विकृतियाग एव संधिदिने प्रकृतिस्तून
उत्तरदिने इति ॥ अथ स्थंडिलकरणादि निर्णयः तत्र चौलादिहो २
मो लौकिकाग्नौ पार्वणस्थालीपाकश्रवणाकर्मादिहोमा गृह्याग्नौ ॥

तत्र लौकिकाग्निहोमे स्थंडिलकरणाद्यग्निप्रतिष्ठापनांतो विधिर्नियतः
गृह्याग्निहोमे पि गृहप्रवेशवास्तुहोमशूलगवानडुह्यादिषु निय
तः धार्यो यतेनैतत्संभवात् यदा समिद्धादौ अग्निसमारोपस्तदा
गृह्याग्निकर्तव्ये पि स्थालीपाकादौ नियतः एतत्सर्वमभिप्रेत्य
त्र कुर्वते होष्यन्त्यादिति गृह्योक्ताग्निप्रतिष्ठापनविधेर्विषयं प्रद
र्शयितुमाह कारिकाकारः प्रतिष्ठाप्याथ लौकिकं वास्तुहोमायातं
हविर्भुजं एतदंतं प्रकुर्वीत होष्यन्संस्थापिते नके॥ इति अन्य
थासंस्थापितेनके होष्यान्तीति व्यर्थं स्यात्। एवं स्थंडिलकरणादि
विषयं निर्णयस्य स्थंडिलादि कुर्यात् तत्र यजमानः कृतनित्यक्रि

स्था० पःकृत्विः परिहित धौतवासा दर्भपाणिः पीठोपविष्टः प्राङ्मुखो वाग्य
तोहिराचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं
३ ममुककर्मकरिष्ये। तदंगहोमं कर्तुं स्थंडिलादि करिष्ये इति संकल्प्य गो
लि० मयादि भूचक्रहृद्देशे शुद्धमृदाईत्रान्यारंभमुदकसंस्थं चतुरंगुलो
न्नतमंगुलोन्नतं वा चतुर्दिक्षु मीकितादिसमत्यंगुलपरिधिकं कं
लितमष्टादशांगुलविस्तृतं होमानुसारेण तदधिकं वान्यूनं न्य
नम ध्यान्नतं स्थंडिलं कुर्यात् तत्क्रामये नघ्रदक्षिणासु ... य।
दक्षिणेष्टौ उदीच्यां हृ प्राचीच्यां चत्वारि प्राच्यामध्यमित्यं ३
लानित्यक्का दक्षिणोपक्रमामुदक्संस्थां प्राहेरामात्रामेकांलेखां